# Amba Navaratnamalika 2

# અમ્બાનવરત્નમાલિકા ૨

## Document Information

Text title : Amba Navaratnamalika 2

File name : ambAnavaratnamAlikA2.itx

Category : devii, pArvatI, devI, nava

Location : doc_devii

Transliterated by : Sandhya Kunnatur

Proofread by : Sandhya Kunnatur

Latest update : September 3, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 3, 2025

*sanskritdocuments.org*

# અમ્બાનવરત્નમાલિકા ૨

શ્રીમત્ત્રિપુરામ્બિકાયૈ નમઃ ।
નિત્યચિદાનન્દમયીં નિરુપમગુણકલિતલલિતલાવણ્યામ્ ।
નિખિલનિલિમ્પવરેણ્યાં નિત્યશરણ્યાં નમામિ ભુવનેશીમ્ ॥ ૧॥

પાપવિનાશનનિરતાં પાવનચરિતાં પરાવરૈર્વિનુતામ્ ।
પરમદયારસભરિતાં પરશિવદયિતાં નમામિ ભુવનેશીમ્ ॥ ૨॥

અનુભૂતિમાત્રસારામખિલોદારામપારગમ્ભીરામ્ ।
અમૃતપયોધિવિહારામરુણાકારાં નમામિ ભુવનેશીમ્ ॥ ૩॥

પુણ્યૈકસમધિગમ્યાં પુરુતરનિજમહિમલબ્ધપારમ્યામ્ ।
પૂજકસન્તતિસૌમ્યાં પુરહરસામ્યાં નમામિ ભુવનેશીમ્ ॥ ૪॥

બન્ધૂકકુસુમરક્તાં ભક્તજનોદ્ધરણબહુવિધાસક્તામ્ ।
ભવહૃદયસાનુરક્તાં બહુગુણયુક્તાં નમામિ ભુવનેશીમ્ ॥ ૫॥

નિગમલસત્પરમાર્થાં નિજજનતતિવિહિતપરમપુરુષાર્થામ્ ।
નિઃશ્રેયસૈકસાર્થાં નિખિલસમર્થાં નમામિ ભુવનેશીમ્ ॥ ૬॥

અમરાવનૈકદીક્ષામસુરવિપક્ષામસાધુકૃતશિક્ષામ્ ।
અધ્વરધિક્કૃતદક્ષામક્ષાલક્ષાં નમામિ ભુવનેશીમ્ ॥ ૭॥

રાજીવચપલનયનાં મૌક્તિકરાજીવ વિશદશુભરદનામ્ ।
રાજીવવિજયિવદનાં રાજ્યનિધાનાં નમામિ ભુવનેશીમ્ ॥ ૮॥

પીનોત્તુઙ્ગસુવૃત્તસ્તનયુગજિતમદનકુમ્ભિકુમ્ભયુગામ્ ।
શુમ્ભાદિદમ્ભશમનીં શમ્ભુમનોજ્ઞાં નમામિ ભુવનેશીમ્ ॥ ૯॥

નવરત્નમાલિકાખ્યામેતામાર્યામુદારસવિશેષામ્ ।
ગુરુરાજસુકૃતિરચિતાં દયયા સાઙ્ગીકરોતુ નિજહૃદયે ॥ ૧૦॥

ઇતિ અમ્બાનવરત્નમાલિકા (૨) સમ્પૂર્ણા ।

શ્રીમદ્ભિરણ્ણયાચાર્યૈઃ વિરચિતા

Encoded and proofread by Sandhya Kunnatur

*Amba Navaratnamalika 2*
pdf was typeset on September 3, 2025

Please send corrections to *sanskrit@cheerful.com*